सुखदोह्या, स्त्री, (सुखेन दोह्या दोहनयोग्या।) सुखसंदोह्या गौः। इति हेमचन्द्रः॥

सुखभाक्, [ज्] त्रि, सुखी। सुखं भजते इति। ठाञ्जवहसहो विण्। इत्यनेन सुखशब्दपूर्व्वक-भजधातोर्व्विण्प्रत्ययेन निष्पन्नः। इति मुग्धबोधव्याकरणम्॥ (यथा, वृहत्संहितायाम्। ४७। ५।

"निर्व्वैराः क्षितिपाः सुखभाजः
संहृष्टाश्च जना गतरोगाः॥)

हृष्टपरिष्वङ्गः। इति महाभारते मोक्षधर्म्मः॥

सुखमोदा, स्त्री, (सुखकरो मोदो यस्याः।) सल्लकीवृक्षः। इति राजनिर्घण्टः॥

सुखरात्रिः, } स्त्री, (सुखकरी रात्रिर्यस्या-
सुखरात्रिका, } मिति। पक्षे कप्।) दीपान्विताामावास्यारात्रिः। तद्विधानं यथा, ज्योतिषे।

"तुलाराशिगते भानौ अमावास्यां नराधिपः।
स्नात्वा देवान् पितॄन् भक्त्या संपूज्याथ प्रणम्य च
कृत्वा तु पार्व्वणश्राद्धं दधिक्षीरगुड़ादिभिः।
ततोऽपराह्नसमये घोषयेन्नगरे नृपः।
लक्ष्मीः संपूज्यतां लोका उल्काभिश्चापि
वेष्ट्यताम्॥"*॥

दर्शद्वैधे प्रदोषव्याप्त्या निर्णयः।

"तुलासंस्थे सहस्रांशौ प्रदोषे भूतदर्शयोः।
उल्काहस्ता नराः कुर्य्युः पितॄणां मार्गदर्शनम्॥"
इति ज्योतिषात्॥

उभयतः प्रदोषप्राप्तौ परदिन एव युग्मात्।

"दण्डैकरजनीयोगो दर्शस्य स्यात् परेऽहनि।
तदा विहाय पूर्व्वेद्युः परेऽह्नि सुखरात्रिका॥"
इति ज्योतिर्व्वचनाच्च॥

उभयत्र प्रदोषाव्याप्तावपि उल्कादानं परदिने पूर्व्वोक्तपार्व्वणानुरोधात्।

"भूताहे ये प्रकुर्व्वन्ति उल्काग्रहमचेतसः।
निराशाः पितरो यान्ति शापं दत्त्वा सुदारुणम्॥"
इति ज्योतिर्व्वचनाच्च॥*॥

अत्रैव लक्ष्मीः पूर्व्वाह्ने रात्रौ पूज्या।

"अमावास्या यदा रात्रौ दिवाभागे चतुर्द्दशी।
पूजनीया तदा लक्ष्मीर्व्विज्ञेया सुखरात्रिका॥"
इति ज्योतिर्व्वचनात्॥*॥

उल्काग्रहणादिपितृकृत्यत्वात् प्राचीनावीतिना दक्षिणामुखेन कर्त्तव्यम्। तथा च मनुः।

"प्राचीनावीतिना सम्यगपसव्यमतन्द्रिणा।
पित्र्यमानिधनात् कार्य्यं विधिवद्दर्भपाणिना॥"

तत्र ग्रहणमन्त्रः।

"शस्त्राशस्त्रहतानाञ्च भूतानां भूतदर्शयोः।
उज्ज्वलज्योतिषा देहं दहेयं व्योमवह्निना॥"

दानमन्त्रश्च।

"अग्निदग्धाश्च ये जीवा येऽप्यदग्धाः कुले मम
उज्ज्वलज्योतिषा दग्धास्ते यान्तु परमां गतिम्॥"

विसर्ज्जनमन्त्रः।

"यमलोकं परित्यज्य आगता ये महालये।
उज्ज्वलज्योतिषा वर्त्म प्रपश्यन्तो व्रजन्तु ते॥"*

ब्रह्मपुराणम्।

"अमावास्यां यदा देवाः कार्त्तिकेमासि केशवात्
अभयं प्राप्य सुप्ताश्च क्षीरोदार्णवसानुषु॥
लक्ष्मीर्दैत्यभयान्मुक्ता सुखं सुप्ताम्बुजोदरे।
चतुर्युगसहस्रान्ते ब्रह्मा स्वपिति पङ्कजे॥
अतोऽत्र विधिवत् कार्य्या मनुष्यैः सुखरात्रिका
दिवा तत्र न भोक्तव्यमृते बालातुराज्जनात्॥
प्रदोषसमये लक्ष्मीं पूजयित्वा यथाक्रमम्।
दीपवृक्षास्तथा कार्य्या भक्त्या देवगृहेष्वपि॥
चतुष्पथश्मशानेषु नदीपर्व्वतसानुषु।
वृक्षमूलेषु गोष्ठेषु चत्वरेषु गृहेषु च॥
वस्त्रैः पुष्पैः शोभितव्याः क्रयविक्रयभूमयः।
दीपमालापरिक्षिप्ते प्रदोषे तदनन्तरम्॥
ब्राह्मणान् भोजयित्वादौ विभोज्य च बुभुक्षि-
तान्।
अलङ्कृतेन भोक्तव्यं नववस्त्रोपशोभिना।
स्निग्धैर्मुग्धैर्व्विदग्धैश्च बान्धवैर्भृतकैः सह॥"

मुग्धैः सुन्दरैः। मुग्धः सुन्दरमूढ़योरिति विश्वः॥*॥ अत्र लक्ष्मीपूजायां पुष्पदानकाले।

"नमस्ते सर्व्वदेवानां वरदासि हरिप्रिये।
या गतिस्त्वत्प्रपन्नानां सा मे भूयात् तदर्च्चनात्"

लक्ष्म्यै नमः। इत्यनेन वारत्रयं पूजयेत्।

"सुखरात्र्यां प्रदोषे तु कुवेरं पूजयन्ति ये॥"

इति रुद्रधरधृतात् कुवेरमपि पूजयन्ति।

"धनदाय नमस्तुभ्यं निधिपद्माधिपाय च।
भवन्तु त्वत्प्रसादान्मे धनधान्यादिसम्पदः॥"

इति पठित्वा कुवेराय नमः। इति त्रिः पूजयेत्। ततो देवगृहादिषु दीपान् दद्यात्। तत्र मन्त्रः।

"अग्निज्योती रविर्ज्योतिश्चन्द्रज्योतिस्तथैव च।
उत्तमः सर्व्वज्योतीनां दीपोऽयं प्रतिगृह्यताम्॥"

ततो ब्राह्मणान् बन्धूंश्च भोजयित्वा स्वयं भुक्त्वा सुखं सुप्त्वा प्रत्यूषे भविष्योक्तं कर्म्म कुर्य्यात्। यथा,—

"सुखरात्रेरुषःकाले प्रदीपोज्ज्वलितालये।
बन्धुवर्गं नवन्धूंश्च वाचा कुशलयार्च्चयेत्॥
प्रदीपवन्दनं कार्य्यं लक्ष्मीमङ्गलहेतवे।
गोरोचनाक्षतश्चैव दद्यादङ्गेषु सर्व्वतः॥"

लक्ष्मीपूजामन्त्रः।

"विश्वरूपस्य भार्य्यासि पद्मे पद्मालये शुभे।
महालक्ष्मि नमस्तुभ्यं सुखरात्रिं कुरुष्व मे॥
वर्षाकाले महाघोरे यन्मया दुष्कृतं कृतम्।
सुखरात्रिप्रभातेऽद्य तन्मे लक्ष्मीर्व्यपोहतु॥
या रात्रिः सर्व्वभूतानां या च देवेष्ववस्थिता।
संवत्सरप्रिया या च सा ममास्तु सुमङ्गला॥
माता त्वं सर्व्वभूतानां देवानां सृष्टिसम्भवा।
आख्याता भूतले देवि सुखरात्रि नमोऽस्तु ते॥"

लक्ष्म्यै नमः। इति त्रिः पूजयेत्। इति तिथ्यादितत्त्वम्॥

सुखवर्च्चकः, पुं, (सुखं वर्च्चयति उद्दीपयतीति। वर्च्च+णिच्+ण्वुल्) सर्ज्जिकाक्षारः। इत्यमरः। २। ९। १०९॥

सुखवर्च्चाः, [स्] पुं, (सुखं वर्च्चयतीति। वर्च्च+असुन्।) सर्ज्जिकाक्षारः। इति राजनिर्घण्टः॥

सुखवासः, पुं, (सुखकरो वासो यस्य।) फलविशेषः। तरमूज इति भाषा। तत्पर्य्यायः। शीर्षवन्तः २। इति रत्नमाला॥

सुखवासनः, पुं, (सुखं वासयतीति। वस+णिच्+ल्युः।) सुखवासनगन्धद्रव्यम्। यथा,—

"मुखवासकरो गन्ध आमोदी सुखवासनः।
सुखवासन इत्येके शुभवासन इत्यपि॥"
इति शब्दरत्नावली॥

सुखसन्दुह्या, स्त्री, सुशीला गौः। इत्यमरटीकायां भरतः। २। ८। ७१॥

सुखसन्दोह्या, स्त्री, (सुखेन सन्दोह्या।) सुशीला गौः। तत्पर्य्यायः। सुव्रता २। इत्यमरः। २। ८। ७१॥ सुखदोह्या ३। इति हेमचन्द्रः॥ सुखदुह्या ४। इति भरतः॥

सुखा, स्त्री, (सुखमस्त्यस्यामिति। अच्। टाप्।) वरुणपुरी। इति मेदिनी॥

सुखाधारः, पुं, (सुखानामाधारः।) स्वर्गः। इति शब्दरत्नावली॥ सुखस्याधारे, त्रि॥

सुखायतः, पुं, (सुखेन आयम्यते इति। आ+यम+क्तः।) सुशिक्षिताश्वः। यथा,—

"सुखायतः शुभमुखः सुखचारः सुखायनः।"
इति शब्दमाला॥

सुखायनः, पुं, (सुखेन अयति गच्छति अनेनेति अय+ल्युट्।) सुशिक्षिताश्वः। यथा,—

"सुखायतः शुभ मुख सुखचारः सुखायनः।"
इति शब्दमाला॥

सुखावतीश्वरः, पुं, (सुखावत्या ईश्वरः।) बुद्धभेदः। हेमचन्द्रः॥

सुखावहः, त्रि, (आवहतीति। आ+वह+अच्। सुखस्य आवहः।) सुखदाता। यथा,

"सर्व्वपापहरं पुण्यं सर्व्वापद्विनिवारकम्।
सर्व्वकामार्थदं देवि! साधकानां सुखावहम्॥"
इति वटुकभैरवस्तोत्रम्॥

सुखाशः, पुं, (सुखा सुखयुक्ता आशा यस्य। यद्वा सुखायां पुर्य्यां शेते इति। शी+डः।) वरुणः। (सुखेन अश्यते इति। अश+घञ्।) राजतिनिशः। (अश भोजने+भावे घञ्। सुखेन आशः।) सुखभोजनम्। इति मेदिनी॥

सुखाशकः, पुं, (सुखाश एव। स्वार्थे कन्।) राजतिनिशः। इति शब्दमाला॥

सुखी, (न्) त्रि, (सुखमस्यास्तीति। सुख+इन्।) सुखविशिष्टः। यथा, रामकवचम्।

"स चिरायुः सुखी पुत्री विनयी विजयी भवेत्॥"
"स्वजनं हि कथं हत्वा सुखिनः स्याममाधव।"
इति भगवद्गीता॥
"स स्त्रीर्या न मदं कुर्य्यात् स सुखी तृष्णयोज्-
झितः।
तन्मित्रं यत्र विश्वासः पुरुषः स जितेन्द्रियः॥"
इति गारुड़े ११६ अध्यायः॥